# ऋग्वेद-संहिता

सम्पादक

श्रीमन्मोक्षमूलरभट्टः

## प्रथमो भागः

राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली - 110058

॥ श्रीः ॥

# ऋग्वेद-संहिता

## श्रीमत्सायणाचार्यविरचित-माधवीयवेदार्थप्रकाशसहिता

*( प्रथमं मण्डलम् )*


सम्पादकः

जर्मनदेशोत्पन्न–इङ्गलैण्डदेशवास्तव्यः

**श्रीमन्मोक्षमूलरभट्टः**


*[ प्रथमो भागः ]*


राष्ट्रिय संस्कृत संस्थान

मानित विश्वविद्यालय

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी

नई दिल्ली- 110058

# CONTENTS.


| | PAGE |
|---|---|
| PREFACE TO THE FIRST VOLUME OF THE FIRST EDITION | vii |
| PREFACE TO THE SECOND VOLUME OF THE FIRST EDITION | xxix |
| PREFACE TO THE THIRD VOLUME OF THE FIRST EDITION | xli |
| PREFACE TO THE SECOND EDITION | li |
| VARIETAS LECTIONIS | 1-65 |
| TEXT AND COMMENTARY, MAN*D*ALA 1 | १-७२४ |
| ABBREVIATIONS USED IN THE REFERENCES | ७२५ |

mentary is always divided by ॥ ॥ from the rest, while in all the rest of this MS. the beginning of the grammatical explanations is not marked at all.

C 1 *b*. A second MS. of the National Library at Paris, comprehending the first Ash*t*aka only, and very negligently written.

C 2. The next MS. of this class is a copy which Dr. Mill brought over from India, and which he kindly lent me for my edition. It will hereafter be deposited in the Bodleian Library at Oxford, for which the whole collection of Dr. Mill's Sanskrit MSS. has lately been purchased. It contains all the eight Ash*t*akas complete, with the usual omissions of the C MSS., and is written very carefully and distinctly.

C 3. One volume, containing the first Ash*t*aka only. It belonged formerly to the Sanskrit College at Calcutta, afterwards to Professor Wilson, and is now deposited in the Bodleian Library.

C 4. A complete copy of Sâya*n*a's commentary, forming Nos. 78–86 in Professor Wilson's collection of Sanskrit MSS. in the Bodleian Library. It is dated Sa*m*vat 1890 = 1834 A. D.

C 5. Another copy belonging to the same collection, and entered in the Catalogue under Nos. 57–60. It comprehends the first, third, and fourth Ash*t*akas only; the second being supplied by another MS., No. 74, which contains six only out of the eight Adhyâyas.

C 6. A Bengali MS., containing the text and commentary of the first two Adhyâyas of the first Ash*t*aka. This likewise forms part of Professor Wilson's collection, and is entered in the Catalogue of the Bodleian Library under No. 75.

That all these MSS. must be considered as separated from the MS. of Sâya*n*a himself by at least one degree, I conclude from the existence of such mistakes as are common to all the three classes of our MSS. I do not mean to say that Sâya*n*a may not himself have committed mistakes in writing his commentary. On the contrary, there are mistakes in all the MSS. which most probably rest upon Sâya*n*a's own responsibility. For instance, Rv. I. 117, 4, the grammatical explanation of दुरेवैः evidently contains a mistake: yet all the MSS. quote the same Sûtra of Pâ*n*ini (III. 3, 126), and there can be little doubt that Sâya*n*a himself is the author of this wrong quotation[1]. If mistakes of this kind occur only in one class of MSS., or in two, but not in all three at the same time; it must frequently remain uncertain whether they are to be laid to the charge of Sâya*n*a or his transcribers. For instance, Rv. I. 97, 3, A has संज्ञापूर्वकस्य

[1] Instead of दुरुपपदादेतेरीषद्दुःसुष्विति खल्, वन्निति भावे वन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। बहुव्री-
Sâya*n*a ought to have written इण् गतौ। इण्शीङ्भ्यां हौ गतिकारकोपपदादित्युत्तरपदप्रकृतिस्वरत्वं ॥

।। श्रीः ।।

# ऋग्वेद-संहिता

श्रीमत्सायणाचार्यविरचित-माधवीयवेदार्थप्रकाशसहिता

(द्वितीयमण्डलादि-षष्ठमण्डलपर्यन्तम्)


सम्पादकः

जर्मनदेशोत्पन्न-इङ्गलैण्डदेशवास्तव्यः

**श्रीमन्मोक्षमूलरभट्टः**


[ द्वितीयो भागः ]


राष्ट्रिय संस्कृत संस्थान

मानित विश्वविद्यालय

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी

नई दिल्ली-110058

नराशंसो नरैर्नेतृभिर्ऋत्विग्भिः शंसनीय एतन्नामकोऽग्निः स्वर्चिः शोभनज्वालः सन् धामानि स्थानान्याज्यधिकरणानि तेजांसि प्रति प्रत्येकं मह्ना स्वमहिम्नांजन् व्यक्तीकुर्वन् तिस्रो दिवो द्योतमानांस्त्रीन् भूम्यादिलोकांश्च प्रति प्रत्येकमंजन्। स्थित्या भूमिं प्रकाशेनांतरिक्षं हविष्प्रापणेन दिवमित्यभिप्रायः। यद्वा लोकानां प्रत्येकं त्रित्वोपेतत्वात् तिस्रो दिव इत्यविरुद्धं। तिस्रो दिवः पृथिवीस्तिस्रः।४. ५३. ५.। इत्यादिमंत्रवर्णात् त्रयो वा इमे त्रिवृतो लोका इति ब्राह्मणाच्च। तथा घृतप्रुषा घृतं सिंचता मनसा हव्यमुंदन् क्लेदयन् स्निग्धीकुर्वन् यज्ञस्य मूर्धन् मूर्धनि मुखे होमसमये देवान्यष्टव्यान् समनक्तु। सम्यक् व्यक्तीकरोतु। तर्पयत्वित्यर्थः ॥

**ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य।**
**स आ वह मरुतां शर्धो अच्युतमिंद्रं नरो बर्हिषदं यजध्वं ॥३॥**

**ईळितः। अग्ने। मनसा। नः। अर्हन्। देवान्। यक्षि। मानुषात्। पूर्वः। अद्य।**
**सः। आ। वह। मरुतां। शर्धः। अच्युतं। इंद्रं। नरः। बर्हिऽसदं। यजध्वं ॥३॥**

हे अग्ने ईळितोऽस्माभिः स्तुतः सन् मनसास्मदनुरक्तेन देवानां यागबुद्ध्या वार्हन् यागयोग्यः सन् मानुषाद्धोतुः पूर्वः पूर्वभावी नोऽस्मदर्थमद्यास्मिन्दिने देवान् यष्टव्यान् यक्षि। त्वमेव यजसि। स तादृशो यष्टा त्वमावह। आकारय। कान्। मरुतां शर्धो गणं। अच्युतमक्षीणमिंद्रं तदविनाभूतमिंद्रमपि। यद्वा मरुद्भलोपेतमिंद्रं। अनंतरं हे नरो नेतार ऋत्विजो बर्हिषदं बर्हिषि सीदंतं तमिंद्रं यजध्वं। पूजयध्वं ॥

**देवं बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्यां।**
**घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः ॥४॥**

**देवं। बर्हिः। वर्धमानं। सुऽवीरं। स्तीर्णं। राये। सुऽभरं। वेदी इति। अस्यां।**
**घृतेन। अक्तं। वसवः। सीदत। इदं। विश्वे। देवाः। आदित्याः। यज्ञियासः ॥४॥**

हे बर्हिर्देव एतदभिमानिन्नग्ने वर्धमानं सुवीरं शोभनवीरसंपादकं सुभरं सुपूर्णं स्तीर्णमस्मदीयैर्ऋत्विग्भिराच्छादितं भव। किमर्थं। राये धनाय। अस्यां वेदी वेद्यां॥ सप्तम्यर्थे प्रगृह्यसंज्ञा। संहितायां यणादेशश्छांदसः॥ घृतेनाज्येनाक्तमिदं स्निग्धं बर्हिः सीदत। के। हे वसव एतन्नामकाः। हे विश्वे सर्वे देवाः। हे आदित्याः। यज्ञियासो यज्ञार्हास्ते यूयमिदं बर्हिर्निषीदत। अस्मिन्बर्हिषि निषीदतेत्यर्थः॥

**वि श्रयंतामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः।**
**व्यचस्वतीर्वि प्रथंतामजुर्या वर्णं पुनाना यशसं सुवीरं ॥५॥**

**वि। श्रयंतां। उर्विया। हूयमानाः। द्वारः। देवीः। सुप्रऽअयनाः। नमःऽभिः।**
**व्यचस्वतीः। वि। प्रथंतां। अजुर्याः। वर्णं। पुनानाः। यशसं। सुऽवीरं ॥५॥**

द्वारो देवीरग्नेर्द्वाराभिमानिन्यो देव्यो विश्रयंतां। विविच्य श्रयंतां। विवृतापिधाना भवंतु। कीदृश्यस्ताः। उर्विया। उर्व्यो महत्यः। नमोभिर्नमस्कारोपेतैः स्तोत्रैर्हूयमानाः। सुप्रायणाः। सुष्ठु प्रकर्षेण गंतव्याः। ईदृश्यो देव्यो विश्रयंतां। किंच व्यचस्वतीर्व्याप्तिमत्योऽजुर्या अहिंस्या अजनना वा सुवीरं शोभनपुत्राद्युपेतं यशसं यशोयुक्तं वर्णं वर्णनीयं रूपविशेषं पुनाना यजमानाय शोधयित्र्यः संपादयित्र्यो देव्यो विप्रथंतां। विशेषेण प्रख्याता भवंतु॥ ॥२२॥

**साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते।**
**तंतुं ततं संवयंती समीची यज्ञस्य पेशः सुदुघे पयस्वती ॥६॥**

॥ श्रीः ॥

# ऋग्वेद-संहिता

श्रीमत्सायणाचार्यविरचित-माधवीयवेदार्थप्रकाशसहिता

( सप्तममण्डलादि-नवममण्डलपर्यन्तम् )

सम्पादकः
जर्मनदेशोत्पन्न-इङ्गलैण्डदेशवास्तव्यः
श्रीमन्मोक्षमूलरभट्टः

[ तृतीयो भागः ]

राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली- 110058

मघवन् धनवन्निंद्र विदुर्विद्वान् कविः क्रांतकर्मा क्रांतप्रज्ञो वा सन् गिरः स्तोतॄनस्मान् पिशा रूपेण हिरण्यादिना वा गोभिश्चाश्वैश्चाभि अभितो रद । त्वायतस्त्वत्कामानस्मान् राये शिशीहि । धनार्थं च संस्कुरु ॥

इमा उ त्वा पस्पृधानासो अत्र मंद्रा गिरो देवयंतीरुप स्थुः ।
अर्वाची ते पथ्या राय एतु स्याम ते सुमताविंद्र शर्मन् ॥ ३ ॥

इमाः । ऊं इति । त्वा । पस्पृधानासः । अत्र । मंद्राः । गिरः । देवऽयंतीः । उप । स्थुः ।
अर्वाची । ते । पथ्या । रायः । एतु । स्याम । ते । सुऽमतौ । इंद्र । शर्मन् ॥ ३ ॥

हे इंद्र त्वा त्वामत्र यज्ञे स्तोतरि वा प्रवर्तमानाः पस्पृधानासः स्पर्धमाना मंद्रा मोदमाना इमा गिरः स्तुतय उप स्थुः । उपतिष्ठंति । अतस्ते तव रायो धनस्य पथ्या सृतिरर्वाच्यस्मदभिमुख्येतु । गच्छतु । हे इंद्र वयं च ते सुमतौ सुष्टुतौ वर्तमानाः शर्मन् शर्मणि सुखे स्याम । भूयास्म ॥

धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ।
त्वामिन्मे गोपतिं विश्व आहा न इंद्रः सुमतिं गंत्वच्छ ॥ ४ ॥

धेनुं । न । त्वा । सुऽयवसे । दुधुक्षन् । उप । ब्रह्माणि । ससृजे । वसिष्ठः ।
त्वां । इत् । मे । गोऽपतिं । विश्वः । आह । आ । नः । इंद्रः । सुऽमतिं । गंतु । अच्छ ॥ ४ ॥

हे इंद्र सुयवसे सुतृणे गोष्ठे वर्तमानां धेनुं न धेनुमिव सुहविष्के यज्ञगृहे । दृष्टांतसामर्थ्याद्दार्ष्टांतिकलाभः । वर्तमानं त्वां दुधुक्षन् ॥ संहितायां व्यत्ययेन दकारः ॥ कामान् दोग्धुमिच्छन्वसिष्ठो ब्रह्माणि वत्सस्थानीयानि स्तोत्राण्युप ससृजे । उपसृजते । मे मम विश्वः सर्वो जनस्त्वामित्त्वामेव गोपतिं गवां स्वामिनमाह । ब्रवीति । अथ परोक्षस्तुतिः । नोऽस्माकं सुमतिं सुष्टुतिमच्छाभि इंद्र आ गंतु । आगच्छतु ॥

अर्णांसि चित्पप्रथाना सुदास इंद्रो गाधान्यकृणोत्सुपारा ।
शर्धंतं शिम्युमुचथस्य नव्यः शापं सिंधूनामकृणोदशस्तीः ॥ ५ ॥

अर्णांसि । चित् । पप्रथाना । सुऽदासे । इंद्रः । गाधानि । अकृणोत् । सुऽपारा ।
शर्धंतं । शिम्युं । उचथस्य । नव्यः । शापं । सिंधूनां । अकृणोत् । अशस्तीः ॥ ५ ॥

नव्यः स्तुत्य इंद्रोऽर्णांसि शत्रुभिर्विदारितायाः परुष्ण्या उदकानि पप्रथाना चित् प्रथमानान्यपि सुदासे राज्ञे गाधानि सुपारा सुपाराणि पारयितुं तर्तुं योग्यानि चाकृणोत् । अकरोत् । अपि च शर्धंतमुत्साहमानं शिम्युं बोधमानं शापं विश्वरूपोद्भवमात्मनोऽभिशापमशस्तीरभिशस्तीश्चोचथस्य स्तोतुः सिंधूनां नदीनामकृणोत् । अकरोत् ॥ ॥ २४ ॥

पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव ।
श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विषूचोः ॥ ६ ॥

पुरोळाः । इत् । तुर्वशः । यक्षुः । आसीत् । राये । मत्स्यासः । निऽशिताः । अपिऽइव ।
श्रुष्टिं । चक्रुः । भृगवः । द्रुह्यवः । च । सखा । सखायं । अतरत् । विषूचोः ॥ ६ ॥

यक्षुर्यज्ञकुशलः ॥ यजेः सन्प्रत्ययो न तु सनंतः । अतो न द्विर्भावः ॥ पुरोळाः पुरोगामी पुरोदाता वा । इदिति पूरणः । तुर्वशो नाम राजासीत् । स तुर्वशो राये धनप्राप्तय इंद्रस्य सखायं सुदासं जगाम । मत्स्यास

॥ श्रीः ॥

# ऋग्वेद-संहिता

## श्रीमत्सायणाचार्यविरचित-माधवीयवेदार्थप्रकाशसहिता

( दशम मण्डलम् )


सम्पादकः

जर्मनदेशोत्पन्न-इङ्गलैण्डदेशवास्तव्यः

श्रीमन्मोक्षमूलरभट्टः


[ चतुर्थो भागः ]


राष्ट्रिय संस्कृत संस्थान

मानित विश्वविद्यालय

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी

नई दिल्ली- 110058

# CONTENTS.


PAGE

PREFACE TO THE FOURTH VOLUME OF THE FIRST EDITION . . . vii

PREFACE TO THE FIFTH VOLUME OF THE FIRST EDITION . . . . lxxxvii

PREFACE TO THE SIXTH VOLUME OF THE FIRST EDITION . . . . cviii

PREFACE TO THE SECOND EDITION . . . . . . . . clxii

VARIETAS LECTIONIS . . . . . . . . . . . . 1–44

TEXT AND COMMENTARY, MAṆḌALA X . . . . . . . . १–५१५

APPENDIX: THE KHILAS OF THE RIG-VEDA . . . . . . ५१७–५४१

ABBREVIATIONS USED IN THE REFERENCES . . . . . . 543

CORRIGENDA . . . . . . . . . . . . . . 544

स तु वस्त्राण्यध पेशनानि वसानो अग्निर्नाभा पृथिव्याः ।
अरुषो जातः पद इळायाः पुरोहितो राजन्यक्षीह देवान् ॥६॥
सः । तु । वस्त्राणि । अध । पेशनानि । वसानः । अग्निः । नाभा । पृथिव्याः ।
अरुषः । जातः । पदे । इळायाः । पुरःऽहितः । राजन् । यक्षि । इह । देवान् ॥६॥

हे राजन्दीप्यमानाग्ने वस्त्राण्याच्छादकानि तेजांसि अधापि च पेशनानि तेषां तेजसां कार्ष्ण्यशौक्ल्यादीनि रूपाणि । यद्वा । अधानंतरं पेशनानि । पेश इति हिरण्यनाम । हिरण्यवद्धिरण्यसदृशानि भास्वराणि तेजांसि । वसान आच्छादयन् पृथिव्या नाभा नाभौ नाभिस्थानीय इळायास्पद उत्तरवेद्यां । एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः । ऐ० ब्रा० १. २८. । इत्याम्नानात् । तस्यां जातः समुत्पन्नोऽरुष आरोचमानो योऽग्निरेवंविधोऽसि स त्वं पुरोहितः पुरतो निहितः पूर्वस्यां दिश्याहवनीयायतने स्थापितः सन्निहास्मिन्यज्ञे देवानिंद्रादीन्यक्षि । यज । पूजय ॥

आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततंथ ।
प्र याह्यच्छोशतो यविष्ठाथा वह सहस्येह देवान् ॥७॥
आ । हि । द्यावापृथिवी इति । अग्ने । उभे इति । सदा । पुत्रः । न । मातरा । ततंथ ।
प्र । याहि । अच्छ । उशतः । यविष्ठ । अथ । आ । वह । सहस्य । इह । देवान् ॥७॥

हे अग्ने त्वमुभे द्यावापृथिवी द्यावापृथिव्यौ सदा सर्वदा ततंथ । आतेनिथ । स्वतेजोभिर्विस्तारयसि खलु बभूथा ततंथेति थलि निपातितः ॥ तत्र दृष्टांतः । पुत्रो न यथा पुत्रो मातरा मातापितरौ पोषणे धनैस्तनोति तद्वत् । किंच हे यविष्ठ युवतम स त्वमुशतः कामयमानानच्छाभिलक्ष्य प्र याहि । प्रकर्षेणागच्छ । अथानंतरं हे सहस्य सहसो बलस्य पुत्र हे अग्ने त्वमिहास्मदीये यज्ञे देवानिंद्रादीना वह । प्रापय ॥ ॥२९॥

पिप्रीहीति सप्तर्चं द्वितीयं सूक्तं । ऋष्याद्याः पूर्ववत् । पिप्रीहीत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः ॥ दर्शपूर्णमासयोराद्या स्विष्टकृतोऽनुवाक्या । सूत्रितं च । अथ स्विष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठेत्यनुवाक्या । आ० १. ६. । इति ॥

पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँर्ऋतुपते यजेह ।
ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः ॥१॥
पिप्रीहि । देवान् । उशतः । यविष्ठ । विद्वान् । ऋतून् । ऋतुऽपते । यज । इह ।
ये । दैव्याः । ऋत्विजः । तेभिः । अग्ने । त्वं । होतॄणां । असि । आऽयजिष्ठः ॥१॥

हे यविष्ठ युवतमाग्ने उशतः स्तुतीः श्रोतुं कामयमानान्देवान्पिप्रीहि । हविर्भिः प्रीणय । हे ऋतुपत ऋतूनां देवयागकालानां स्वामिन्नग्ने ऋतून्यागकालान्विद्वाञ्जानानस्त्वमिहास्मिन्यज्ञे तान्यज । पूजय । किंच हे अग्ने दैव्या देवेषु भवाः अग्निर्होताश्विनावध्वर्यू त्वष्टाग्नीदित्र उपवक्ता । तै० आ० ३. ३. । इत्यचोक्ता य ऋत्विजः संति तेभिस्तैः सह देवान्यज । यद्वा । दैव्या देवेषु भवा ऋत्विज आश्वलायनेनोक्ताश्चंद्रमा ब्रह्मादित्योऽध्वर्युः पर्जन्य उद्गातेति । आ० गृ० १. २३. ८-९. । तैः सह यज । यस्मात्त्वं होतॄणां मध्य आयजिष्ठ आभिमुख्येन देवानां यष्टृतमोऽसि भवसि ॥

वेषि होत्रमुत पोत्रं जनानां मंधातासि द्रविणोदा ऋतावा ।
स्वाहा वयं कृणवामा हवींषि देवो देवान्यजत्वग्निरर्हन् ॥२॥